# मरिच - MARICHA:

नात्यर्थमुष्णं मरिचमवृष्यं लघु रोचनम् । छेदित्वाच्छोषणत्वाच्च दीपनं कफवातजित् ॥

**(CS,su,27)**

स्वादुपाक्यार्द्रमरिचं गुरु श्लेष्म प्रसेकि च ॥ कटूष्णं लघु तच्छुष्कमवृष्यं कफवातजित् ॥

नात्युष्णं नातिशीतं च वीर्यतो मरिचं सितम् । गुणवन्मरिचेभ्यश्च चक्षुष्यं च विशेष्तः ॥

**(SS,su,46)**

रसे पाके च कटुकं कफघ्नं मरिचं लघु || **(AS,su,12/27)**

मरिचं कटु तिक्तोष्णम् पित्तकृत् श्लेष्मनाशनम् ।
वायुं विवरयत्येव जन्तुसन्ताननाशनम् ॥ (DHN)

मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् । उष्णं पित्तकरं रूक्षं श्वासशूलकृमीन् हरेत् ॥

यदार्द्रमधुरं पाके नात्युष्णं कटुकं गुरु । किञ्चित्तीक्ष्णगुणं श्लेष्मप्रसेकि स्यादपित्त्तलम् ॥

**(Bhava Prakasha)**